दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्दः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लचतुर्दशी
ज्येष्ठ 16 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-217 | 1 | मई 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 पी. एम. सूर्य घर योजनया प्रमुखं लक्ष्यं प्राप्तं अस्मिन् प्रायः चत्वारिंशत् लक्षाणि गृहाणि रुफ़टाप सोलर इत्येतम् अङ्गीकृतवन्तः

3 विधानसभाप्रत्याशिनः चयनाय भाजपा-दलस्य सर्वेक्षणं प्रारब्धम्, दूरवाणी-माध्यमेन जनभावनायाः आकलनम्

5 ईश्वरः अस्मिन् कृष्णरूपेण पृथिवीं प्रेषयति किन्तु वयं कर्मणा कंसाः भवामः

## सर्वोच्चन्यायालयेन सर्वेभ्यः उच्चन्यायालयेभ्यः त्रिषु मासेषु एव रक्षिताः आदेशाः घोषयितुं निर्दिष्टम्

हिमसंस्कृतवार्ता। सर्वोच्चन्यायालयेन सम्पूर्ण देशे सर्वेषां उच्चन्यायालयानां कृते निर्देशः प्रदत्तः यत् आरक्षितनिर्णयाः त्रिमासाभ्यन्तरे एव प्रदात्वयम्। सर्वोच्चन्यायालयेन उक्तं यत् निर्णयघोषणायां विलम्बः वादिनां कृते अपरिवर्तनीयां हानिं जनयितुं शक्नोति । व्यक्तिगतस्वातन्त्र्यसम्बद्धेषु प्रकरणेषु शीघ्रनिर्णयस्य आवश्यकता सबलं प्रतिपादित्वा मुख्यन्यायाधीशः सूर्यकान्तः तथा न्यायाधीशः जॉयमाल्य-बागची इत्येतयोः पीठेन उक्तं यत् प्रतिभूत्याः आवेदनविषये निर्णयः तस्मिन्नेव दिने घोषणीयः। यदि निर्णयम् आरक्षितं भवति तर्हि तत् अग्रिमदिने एव प्रकाशितं भवेत्। सर्वोच्चन्यायालयेन अन्येऽपि अनेकाः निर्देशाः प्रदत्ताः। न्यायालयेन उक्तं यत् बन्धनमुक्तेः अथवा दण्डस्थगनस्य आदेशः निर्णयघोषणानन्तरं त्वरितं कारागृह-प्राधिकारिभ्यः प्रेषणीयः। तदनन्तरं विचाराधीनबन्दी तस्मिन्नेव दिने, अथवा यदि तत् सम्भवं न भवति तर्हि अधिकतमं अग्रिमदिने एव मुक्तः करणीयः।

## दिल्ली-सर्वकारः नीट् परीक्षायाम् उपस्थितेभ्यः अभ्यर्थिभ्यः सर्वेषु दिल्ली-परिवहन निगमस्य डी. टी. सी. बसयानेषु निःशुल्क-यात्रा-सुविधां प्रदास्यति

हिमसंस्कृतवार्ता। दिल्ली-सर्वकारः नीट् षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य परीक्षायाम् उपस्थितेभ्यः अभ्यर्थिभ्यः सर्वेषु दिल्ली-परिवहन निगमस्य डी. टी. सी. बसयानेषु निःशुल्क-यात्रा-सुविधां प्रदास्यति। परीक्षा अग्रिममासस्य एकविंशतितमे दिनाङ्के भविष्यति। सामाजिक-माध्यमेन दिल्ली-राज्यस्य मुख्यमन्त्री रेखा-गुप्ता अवदत् यत् अभ्यर्थिनः स्वस्य प्रवेशपत्रं दर्शयित्वा डी. टी. सी. बसयानेषु निःशुल्कं यात्रां कर्तुं शक्नुवन्ति ।

## सीमाणां रक्षणम् अवैधप्रवासनस्य रोधश्च राष्ट्रस्य जनसांख्यिकीयसुरक्षायै महत्त्वपूर्णम्: गृहमन्त्री अमितशाहः



हिमसंस्कृतवार्ता। गृहमन्त्री अमितशाहः उक्तवान् यत् सीमाणां रक्षणम् अवैधप्रवासनस्य रोधश्च राष्ट्रस्य जनसांख्यिकीयसुरक्षायै अत्यन्तं महत्त्वपूर्णम् अस्ति। सः अद्य गुजरातस्य भुजनगरे भारत-पाकिस्तानसीमायां महत्त्वपूर्णयोः जी-७ तथा जी-१३ सीमाचौक्योः (सुरक्षाकेन्द्रयोः) उद्घाटनं कृत्वा सैनिकान् उपस्थितान् जनान् च सम्बोधयति स्म। गृहमन्त्री अवदत् यत् केन्द्रसर्वकारः अभेद्यां सुरक्षाव्यवस्थां (लीक प्रूफ सुरक्षा ग्रिड) स्थापयितुं ड्रेन (मानवरहितविमान), राडार तथा आधुनिकपञ्जरैः (आधुनिक बाड़) सह अत्याधुनिकप्रविधेः उपयोगं करोति। सः नूतनसुरक्षाव्यवस्थया सह सीमाप्रबन्धने परिवर्तनस्य उद्घोषणां कृतवान्। सः अवदत् यत् अस्य प्रतिरूपस्य (मॉडल) अन्तर्गतं नागरिकैः, प्रशासनेन, स्थानीयप्रारक्षकैः (पुलिस) तथा सीमासुरक्षाबलेन (बीएसएफ) सैन्येन च सह मिलित्वा पूर्णक्षेत्रीयसुरक्षाप्रबन्धनं करिष्यते। गृहमन्त्री विगतषड्दशकेभ्यः देशस्य सुरक्षायै अग्रिमरक्षापङ्क्तित्वेन सेवां कुर्वतः सीमासुरक्षाबलस्य (बीएसएफ) प्रशंसां कृतवान्। सः मातृभूम्यै सर्वोच्चं बलिमयदानं कृतवद्भ्यः द्विसहस्रेभ्यः अधिकेभ्यः सीमासुरक्षाबलकर्मचारिभ्यः श्रद्धाञ्जलिं समर्पितवान्। अन्तर्राष्ट्रियसीमाणां सन्दर्भं दत्त्वा गृहमन्त्री अवदत् यत् पश्चिमबङ्गाले नूतनसर्वकारस्य गठनेन सह दीर्घकालात् प्रचलन् गतिरोधः समाप्तः जातः, नूतनराज्यसर्वकारेण च एकस्मिन् सप्ताहे एव सीमापारं पञ्जरस्थापनाय (बाड़ लगाने के लिए) भूमिः उपलब्धा कृता।गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः, गृहराज्यमन्त्री हर्षसांघवी च तथा उच्चसुरक्षाधिकारिणः अस्मिन् अवसरे उपस्थिताः आसन्।

## शिक्षामन्त्रिणा धर्मेन्द्र प्रधानेन परीक्षा अपराध-विरुद्धम् कठोरकार्याचरणाय, योग्यछात्राणां रक्षणाय च आश्वासितम्

हिमसंस्कृतवार्ता। केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र प्रधानः अद्य उक्तवान् यत् प्रश्नपत्र-लीक-प्रकरणम् अतीव दुर्भाग्यपूर्णम् आसीत्। डी. डी. न्यूज इत्यनेन सह विशेष-संवादे श्रीप्रधानः आश्वासितवान् यत् पुनःपरीक्षायाः प्रक्रिया सम्यक् व्यवस्थितरूपेण विना कस्यापि दोषेन च सम्पन्ना भविष्यति। अस्मिन् विषये सः सर्वेषां सहयोगमपि याचितवान्। छात्रान् सम्बोधयन् प्रधानः तान् आश्वासितवान् यत् प्रशासनं तेषां चिन्ताम् अवगच्छति तथा च तेषां विश्वासः आहतः अभवत् इति स्वीकरोति । सः अवदत् यत् अधिकारिणः तदर्थं कठोरः निर्णयः स्वीकृतवन्तः, यत् ते न इच्छन्ति यत् एकस्य अपि योग्यस्य छात्रस्य भविष्यं परीक्षा-अपराधिणां हस्ते अथवा कस्यापि प्रकारस्य दुराचारस्य कारणेन पीडितं न भवेत्। गुणवत्तायाः पारदर्शितायाश्च विषये सबलं प्रतिपादयन् सः अवदत् यत् परीक्षा-व्यवस्थायां निष्पक्षतां स्थापयितुं निर्णयः कृतः। मन्त्रिणा पुनरपि आश्वासितं यत् परीक्षा-प्रक्रियायाः विषये वर्धमानचिन्तायाः मध्ये त्रुटिमुक्तां परीक्षां कर्तुं सर्वविध प्रयत्नः क्रियते। केन्द्रीय-माध्यमिक शिक्षा-परिषदः पुनर्मूल्यांकन-पोर्टल इत्यत्र विद्यमानानां तान्त्रिक-समाह्वानानां विषये उद्भूतानां चिन्तानां प्रतिक्रियारूपेण शिक्षामन्त्रिणा उक्तं यत् सी. बी. एस्. ई. सर्वासां तान्त्रिक समस्यानां समाधानार्थं सक्रियतया कार्यं करोति तथा च छात्राणां कृते पारदर्शकां त्रुटिमुक्तां च डिजिटल-मूल्यांकन-प्रक्रियाम् सुनिश्चितं करोति।

## सुभाषितम्

**हर्षस्थानसहस्राणि,**
**भयस्थानशतानि च।**
**दिवसे दिवसे मूढम्,**
**आविशन्ति न पण्डितम्।।**

भावार्थः- मनुष्य जीवन में हर्ष और भय की सैंकड़ो व हजारों परिस्थितियां दिन प्रतिदिन आती रहती हैं और जो मूढ (अज्ञानी) व्यक्ति होते हैं वे आजीवन इन्हीं में उलझे रहते हैं परन्तु जो विद्वान और ज्ञानी व्यक्ति होते हैं, वे इन परिस्थितियों से कभी प्रभावित नहीं होते हैं।




## कर्णाटकस्य राज्यपालः थावरचन्द गहलोतः मुख्यमन्त्रिणः सिद्धारमैया-वर्यस्य त्यागपत्रं स्वीकृत्य मन्त्रिमण्डलस्य विघटनं कृतवान्

हिमसंस्कृतवार्ता। कर्णाटकस्य राज्यपालः थावरचन्द गहलोतः बेङ्गलूरुनगरे मुख्यमन्त्रिणः सिद्धारमैया-वर्यस्य त्यागपत्रं स्वीकृत्य तत्कालीनेन प्रभावेण मन्त्रिमण्डलं विघटयत्। परञ्च यावत् कार्यवाहक मुख्यमन्त्रीरूपेण वैकल्पिकव्यवस्था न भवति तावत् पर्यन्तम् अस्मिन् काले किमपि निर्णयं न स्वीकर्तुं सहैव अस्मिन् पदे यथावदेव भवितुं आदिष्टम्। सिद्धारमैया वर्यः ह्यः लोकभवने स्वस्य त्यागपत्रं समर्पितवान् आसीत्।

# नीट-प्रश्नपत्ररहस्योद्घाटनस्य विरुद्धं राष्ट्रपतये ज्ञापनं प्रेषयिष्यति हिमाचल-काङ्ग्रेस-दलम्




हिमसंस्कृतवार्ताः- शिमला। अखिलभारतीयकाङ्ग्रेससमितेः (AICC) आह्वानेन प्रदेशकाङ्ग्रेसाध्यक्षः विनयकुमारः प्रदेशस्य सर्वान् मण्डलकाङ्ग्रेसस्य अध्यक्षान् आदिष्टवान् यत् देशे सी.बी.एस.ई.-परीक्षासु सम्मुखम् आगच्छन्तीनाम् अनियमिततानां नीट-प्रश्नपत्ररहस्योद्घाटनस्य (पेपर लीक) च विरोधे जून-मासस्य प्रथमे द्वितीये वा दिनाङ्के केन्द्रीयशिक्षामन्त्रिणः विरुद्धं ज्ञापनं समर्पणीयम्। प्रदेशकाङ्ग्रेससङ्घटनमहासचिवः विनोदजिण्टा अस्मिन् विषये सर्वान् मण्डलाध्यक्षान् उक्तवान् यत् ते स्व-स्वमण्डलानां उपायुक्तानां (डी. सी.) माध्यमेन भारतस्य माननीयाय राष्ट्रपतये ज्ञापनं प्रेषयन्तु। ज्ञापने देशस्य परीक्षाप्रणाल्याः अखण्डतां रक्षितुं केन्द्रसर्वकारस्य केन्द्रीयशिक्षामन्त्रिणः च कथितानां विफलतानां विषयः प्रमुखतया उत्थापयिष्यते। विनोदजिण्टा अवदत् यत् देशव्यापी प्रायः २४ लक्षं छात्राः नीट-परीक्षायां भागं गृहीतवन्तः आसन्, किन्तु नीट-प्रश्नपत्ररहस्योद्घाटनस्य विवादेन (पेपर लीक) मूल्याङ्कनप्रक्रियायां च निरन्तरं प्रकटिताभिः अनियमितताभिः लक्षशः छात्राः तेषां परिवाराः च महतः मानसिकावसादस्य चिन्तायाः च सम्मुखिनः अभवन्। सः अवदत् यत् सी.बी.एस.ई. तथा अन्यासां प्रतियोगीपरीक्षाणां पारदर्शितायाः निष्पक्षतायाः च उपरि उत्तिष्ठन्तः प्रश्नाः छात्राणां अभिभावकानां च विश्वासं शिथिलम् अकुर्वन्। सः आरोपं कृतवान् यत् पत्रगोपनविस्फोटः (पेपर लीक), कुप्रबन्धनम् परीक्षाप्रणाल्यां च पुनः पुनः जायमानाः त्रुटयः देशस्य यूनां भविष्यं सुरक्षितं कर्तुं केन्द्रसर्वकारस्य पूर्णविफलतां प्रदर्शयन्ति। जिण्टा महोदयः अवदत् यत् स्वकीयम् उत्तरदायित्वं स्वीकृत्य कार्यं करण्याः स्थाने केन्द्रीयशिक्षामन्त्री विपक्षनेता राहुलगांधीमहोदयस्य विरुद्धं निराधारां वक्तृतां करोति, यस्याः काङ्ग्रेसदलम् उग्रं निन्दति। सः सर्वान् मण्डलकाङ्ग्रेसस्य अध्यक्षान् प्रार्थितवान् यत् ज्ञापनकार्ये दलस्य सर्वेषां नेतृणाम्, पदाधिकारिणां कार्यकर्तृणां च उपस्थितिः सुनिश्चिता करणीया, येन देशस्य प्रतिभावतां यूनां स्वरः दृढतया उत्थापयितुं शक्येत।

# HRTC- जून-मासस्य प्रथमात् दिनाङ्कात् 'हिमबसपत्रं' विना न प्राप्स्यते निःशुल्का यात्रा




हिमसंस्कृतवार्ताः- शिमला। राज्यस्य शासकीयविद्यालयानां छात्रेभ्यः एच. आर. टी. सी. यानेषु उपलभ्यमाना निःशुल्कयात्रासुविधा अधुना हिम-यान-पत्रेण (हिम बस कार्ड) सह सम्बद्धा कृता। १ जून २०२६ दिनाङ्कात् आरभ्य 'हिम बसकार्ड' अथवा अनुमतिपत्रं (पास) विना छात्रेभ्यः एच.आर.टी.सी.-यानेषु निःशुल्कयात्रायाः सुविधा न प्राप्स्यते। यद्यपि पत्रनिर्माणस्य अन्तिमा तिथिः ३१ मई निश्चिता अस्ति, किन्तु सम्प्रति राज्यव्यापी केवलं १२,५०२ छात्रैः एव 'हिम बस कार्ड' निर्मितम् अस्ति।

प्रदेशस्य शासकीयविद्यालयेषु प्रायः सप्तलक्षतः (७ लाख) अधिकाः छात्राः अध्ययनं कुर्वन्तः सन्ति। पूर्वं प्रथमकक्षायाः द्वादश्यकक्षापर्यन्तं छात्रेभ्यः सामान्ययात्रापत्रेण (बस पास) निःशुल्कयात्रायाः सुविधा प्राप्यते स्म, किन्तु अधुना निगमप्रबन्धनेन एषा व्यवस्था 'हिम बस कार्ड' इत्यस्मिन् परिवर्तिता। ईदृशे समये अधुना निःशुल्कयात्रायाः कृते 'हिम बस कार्ड' अनिवार्यं भविष्यति। सूचनानुसारं, येषां छात्राणां गृहाणि विद्यालयात् अत्यधिकदूरे सन्ति, ते एव प्रायः यात्रापत्राणि (पास) कारयन्ति। ग्रामीणक्षेत्रेषु जागरूकतायाः अभावात् तान्त्रिकसमस्यानां च कारणात् बहुसङ्ख्याकाः छात्राः अद्यापि आवेदनप्रक्रियां प्रारब्धुं न शक्नुवन्। अपरपक्षे, अनेकेषु जनपदेषु शासकीयविद्यालयानाम् एच.आर.टी.सी.-जालपुटे (वेबसाइट) अद्यतनं (अपडेट) न भवितुं कारणादपि छात्राः समस्यानां सम्मुखीकरणं कुर्वन्तः सन्ति। मण्डी-हमीरपुरसहित कतिपयेषु क्षेत्रेषु विद्यालयाः जालाधारे (पोर्टल) न दृश्यन्ते, येन कारणेन छात्राः 'हिम बस कार्ड' निर्मातुं न शक्नुवन्ति। निगमाधिकारिणां प्रकथनं वर्तते यत् सम्बद्धविद्यालयैः जनपदकार्यालयैः च सूचनायाः प्राप्तौ सत्यां विद्यालयानां जालपुटे निरन्तरम् अद्यतनं क्रियमाणं वर्तते।

### अन्तिमतिथेः वर्धनाय न कश्चित् निर्णयः

एच.आर.टी.सी.-प्रबन्धनेन सम्प्रति 'हिम बस कार्ड' निर्माणस्य अन्तिमतिथिं वर्धयितुं न किमपि निर्णयं स्वीकृतम्। यद्यपि १ जून दिनाङ्कात् परम् अपि पत्राणि निर्मीयिष्यन्ते, किन्तु यावत्पर्यन्तं छात्राणां पत्राणि न निर्मीयन्ते, तावत्पर्यन्तं तैः यानभाटकं दातव्यं भविष्यति।

# पी. एम. सूर्य घर योजनया प्रमुखं लक्ष्यं प्राप्तं अस्मिन् प्रायः चत्वारिंशत् लक्षाणि गृहाणि रुफ़टाप सोलर इत्येतम् अङ्गीकृतवन्तः



**हिमसंस्कृतवार्ता।** भारतेन स्वच्छ ऊर्जा-यात्रायां ऐतिहासिकं सोपानम् आरोहितम्। केन्द्रीय-नवीन-पुनर्नवीकरणीय ऊर्जा-मन्त्री प्रल्हाद जोशी अद्य अवदत् यत् पी. एम. सूर्य-घर-योजनायाः अन्तर्गतं अधुना चत्वारिंशत् लक्षाणि यावत् गृहाणि रुफ़टाप-सोलर-इत्यनेन माध्यमेन शक्तीकृतानि सन्ति। सः अग्रे अवदत् यत् अक्षय-ऊर्जा-उपक्रमात् अधिकतया, एषा परिवर्तनात्मक-योजना नागरिकान् विद्युत-उपभोक्तृत्वात् विद्युत-उत्पादकत्वेन परिवर्तयति। एषा योजना परिवारान् विद्युत्-व्ययं न्यूनीकर्तुं, प्रशासकीय अनुदानात् लाभं प्राप्तुं, विद्युत्-बिल इति शून्यं कर्तुं च समर्थयति। प्रत्येकस्मिन् सौरशक्तियुक्तगृहेण देशः ऊर्जा-सुरक्षां प्रति, पर्यावरण-सुस्थिरतां प्रति, स्वावलंबनस्य विकासित-भारतस्य दृष्टिकोणं प्रति गच्छति इति मन्त्रिणा अवधानं प्रदत्तम्।

# भारत-ऋतु-विभागेन देशे जून-मासे "सामान्यात् न्यूनं" प्रावृट्-वृष्टेः, अनेकेषु राज्येषु "सामान्यात् अधिकं" यावत् उष्णतरङ्गस्य स्थितेः च संभावना प्रकटिता

हिमसंस्कृतवार्ता। भारत-ऋतु-विभागेन देशे जून-मासे "सामान्यात् न्यूनं" प्रावृट्-वृष्टेः, अनेकेषु राज्येषु "सामान्यात् अधिकं" यावत् उष्णतरङ्गस्य स्थितेः च संभावना प्रकटिता। प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, आई. एम्. डी. इत्यस्य महानिर्देशकः डा. मृत्युंजय महापात्रा अवदत् यत् देशे जून-मासे सामान्यवृष्टिः सामान्यात् न्यूनं यावत् भवितुम् अर्हति। सः अवदत् यत् अस्मिन् काले केवलं देशस्य केषुचित् भागेषु, यथा उत्तर पश्चिमे, उत्तर पूर्वे, दक्षिण-द्वीपीये च सामान्यं सामान्यात् अधिकं वा वर्षा भवितुम् अर्हति। सः इतोऽपि सूचितवान् यत् जूनमासे देशस्य अधिकांशेषु भागेषु अधिकतमं तापमानं सामान्यात् अधिकं भवितुम् अर्हति। श्री महापात्रा अवदत् यत् जून्-मासे उत्तरप्रदेशस्य, हरियाणा-राज्यस्य, पञ्जाब्-राज्यस्य, बिहारस्य, ओडिशा-राज्यस्य, छत्तीसगढस्य, गुजरातस्य च अनेकेषु भागेषु सामान्यात् अधिकं उष्णतरङ्गस्य स्थितिः भवितुम् अर्हति।

# भारतं सुदृढ अर्थव्यवस्थारूपेण उद्भूतम् अस्ति, तथा च वस्त्रोद्योग-क्षेत्रे परिष्कारैः नीति-समर्थनेन च द्रुतगत्या वृद्धिः साधिता अस्ति-केन्द्रीय-वस्त्रोद्योग-मन्त्री गिरिराज-सिङ्घः

हिमसंस्कृतवार्ता। केन्द्रीय-वस्त्रोद्योग-मन्त्री गिरिराज-सिङ्घः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्र-मोदी-वर्यस्य नेतृत्वे भारतं सुदृढ अर्थव्यवस्थारूपेण उद्भूतम् अस्ति, तथा च वस्त्रोद्योग-क्षेत्रे परिष्कारैः नीति-समर्थनेन च द्रुतगत्या वृद्धिः साधिता अस्ति। आन्ध्रप्रदेशस्य द्विदिवसीययात्रायाम्, मन्त्रिणा कृष्णा-मण्डलस्य मल्लवल्ली-औद्योगिक-उद्याने मोहन-स्पिनटेक्स्-समवायस्य भ्रमणं कृतम्। सः अवदत् यत् भारतस्य वस्त्र-आपण-मूल्यं सम्प्रति पञ्चदश-लक्ष-कोटिरूप्यकाणि अस्ति तथा च 2030 तमवर्षपर्यन्तं पञ्चविंशति लक्ष-कोटिरूप्यतोप्यधिकं कर्तुं सर्वकारः कार्यं कुर्वन् अस्ति।

# विधानसभाप्रत्याशिनः चयनाय भाजपा-दलस्य सर्वेक्षणं प्रारब्धम्, दूरवाणी-माध्यमेन जनभावनायाः आकलनम्



**हिमसंस्कृतवार्ताः शिमला** ।हिमाचलप्रदेशे आगामि-विधानसभा-निर्वाचनाय यद्यपि अद्यापि समयः अस्ति, तथापि प्रदेशस्य राजनीति-क्षेत्रे आन्तरिक-हलचलः वर्धिता। विपक्षी दलः भाजपा निर्वाचन-रणनीतिं सुदृढां कर्तुं प्रत्याशिनः चयनप्रक्रियां समयात् पूर्वमेव आरब्धवान्। प्रदेशस्य विभिन्नमण्डलेषु एतेषु दिनेषु व्यापकस्तरे सर्वेक्षणं क्रियमाणम् अस्ति, येन सम्भावित-प्रत्याशिनः प्रति जनतायाः मतं ज्ञायते। दलसम्बद्धानां जनानाम्, सामान्यानां मतदातॄणाम्, सामाजिकसंस्थानां तथा च स्थानीयानां प्रभावशालीनां व्यक्तीनां दूरवाणी-माध्यमेन सम्पर्कः क्रियते। दूरवाणी-वार्तालापकाले न केवलं सम्भावित-दावेदाराणां विषये प्रतिपुष्टिः (फीडबैक) स्वीक्रियते, अपितु क्षेत्रस्य प्रमुखाणां समस्यानां, वर्तमान-काङ्ग्रेस-सर्वकारस्य कार्यप्रणाल्याः तथा च भाजपा-नेतृत्वस्य स्वीकार्यतायाः विषयेऽपि प्रश्नाः पृच्छ्यन्ते।अति कुतूहलपूर्णा वार्ता इयं यत् सर्वेक्षणे टिकट-प्राप्तये सम्भावित-दावेदाराणां नामानि स्वीकृत्य जनान् तेषां प्राथमिकता पृच्छ्यते। सर्वेक्षणं कुर्वती संस्था जनान् एकतः चतुः पर्यन्तं क्रमाङ्कनं (रैंकिंग) दातुं कथयति, येन ज्ञातुं शक्येत यत् कस्य नेतुः क्षेत्रे सर्वाधिका स्वीकार्यता अस्ति। राजनैतिक-विशेषज्ञानां विश्वासः अस्ति यत् भाजपा अस्मिन् वारे टिकट-वितरणे स्थानीय-समीकरणानां जनभावनायाः च अधिकं महत्त्वं दातुं रणनीतौ कार्यं करोति। पूर्वतन-निर्वाचनेषु अनेकासु आसनेषु (सीट) टिकट-आवंटनं प्रति असन्तोषः प्रकटितः आसीत्, यस्य प्रभावः निर्वाचनपरिणामेषु अपि अभवत्। अतः दलस्य उच्चकमान् (हाईकमान) अस्मिन् वारे पूर्वमेव धरातलीय-स्थितेः आकलनं कृत्वा सङ्घटनात्मकरूपेण विवरणं (रिपोर्ट) सञ्चीकरोति।

## बहुषु स्तरेषु एकत्र क्रियते सूचना

सर्वेक्षणं केवलं लोकप्रियता-पर्यन्तं सीमितं नास्ति। अस्मिन् इदमपि पृच्छ्यते यत् सम्बन्धितः नेता जनतायाः मध्ये कियान् सक्रियः अस्ति, जनानां समस्यानां निवारणाय तस्य सुलभता कीदृशी अस्ति, तथा च क्षेत्रे तस्य छविः सकारात्मकी अस्ति वा न वा। एतदतिरिच्य स्थानीयविकासस्य, मार्ग-स्वास्थ्य-शिक्षा-रोजगार-पेयजलादीनां समस्यानां विषयेऽपि मतं गृह्यते। भाजपायाः पुरातननेतॄणाम्, युवानां नूतनचेहराणां तथा च सद्यः सक्रियाणां सम्भावित-दावेदाराणां विषये पृथक्-पृथक् प्रतिपुष्टिः एकत्र क्रियते। अनेन दलः इदमवगन्तुं प्रयतते यत् कस्यां सीटे नूतनाय जनाय अवसरप्रदानं लाभदायकं भविष्यति, कुत्र च पुरातनेषु नेतृषु विश्वासः प्रकटयितुं श्रेयस्करं भविष्यति।

## काङ्ग्रेस-सर्वकारस्य विरुद्धं वातावरणस्य आकलनप्रयासः

भाजपायाः एतत् सर्वेक्षणं केवलं टिकट-चयनाय सीमितं नास्ति, अपितु अनेन माध्यमेन दलः प्रदेशे काङ्ग्रेस-सर्वकारं प्रति जनतायाः दृष्टिकोणमपि ज्ञातुम् इच्छति। दूरवाणी-कॉल मध्ये जनान् सर्वकारस्य योजनानां, कर्मचारिणां समस्यानां, मूल्यवृद्धेः (महँगाई), बेरजगारी-विषयस्य तथा च विकासकार्याणां विषयेऽपि प्रश्नाः पृच्छ्यन्ते। अनेन भाजपा आगामि-निर्वाचन-मुद्दानां रूपरेखां सञ्चीकर्तुं संलग्ना दृश्यते। दलः इदमपि ज्ञातुम् इच्छति यत् केषां मुद्दानां कारणात् जनतायाम् अत्यधिकः रोषः अस्ति, केषु क्षेत्रेषु च सङ्घटनेन अधिकः परिश्रमः करणीयः अस्ति।

## ग्रीष्मर्तुकाले जनपुण्यशान्ताः



तप्ता धरा शुष्कमुखा खगाश्च
नद्यो ह्रदास्सम्प्रति वारिहीनाः
तीव्रातपे सीदति जीवलोकः
कुत्रापि सौख्यं नहि दृश्यते हा ।१।
शुष्के गते वारिणि जीवजाता
भ्रमन्ति मार्गे तृषिता हि मुग्धाः
पात्रेषु तोयं गृहबाह्यभागे
दत्त्वा खगेभ्यो जनपुण्यशान्ता ।२।
भूमिन्नु तप्तामनिलञ्च तोयं
रक्षेम जीवान्नु वृक्षदानात्
वृक्षो हि लोकस्य परं निधानं
जीवामृतेनाऽऽभरते नु जीवम् ।३।
वृक्षप्रदानेन धरा सुधन्या
तोयस्य दाने तु खगास्सजीवाः
धर्मो ह्ययं मानवजातिमुख्यो
दत्ते नु कल्याणमहो जनस्य ।४।
तपनकिरणदीप्तौ चन्दनचर्चितान्तो
विहरति सरसारे चापयात्रासु कान्तः
मलयपवनशान्ते हिन्दोलदोलदेवो
भवति सदयकायःप्रार्थिषु वै सहायः ।५।

**रचयिता - आचार्यः डा.रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

# म्यांमारदेशस्य राष्ट्रपतिः यू मिन् आंग ह्लाइंग् अद्यारभ्य जून-मासस्य तृतीयदिनाङ्कं यावत् भारतयात्रायै आगच्छति




म्यांमारदेशस्य राष्ट्रपतिः यू मिन् आंग ह्लाइंग् अद्यारभ्य जून-मासस्य तृतीयदिनाङ्कं यावत् भारतयात्रायै आगच्छति। गतदिने नवदहल्यां विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयस्वालः संवाददातॄन् सूचितवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः म्यांमारदेशस्य राष्ट्रपतेः च मध्ये द्विपक्षीयवार्तायां परस्परसम्बन्धानां दृढीकरणस्य उपायेषु चर्चा भविष्यति।भारत-चीन-सीमाविषयेषु परामर्शाय समन्वयाय च गठितायाः कार्यसमित्याः सद्योजातायाः उपवेशनस्य विषये श्रीजयस्वालः अवदत् यत् चर्चा रचनात्मक आसीत्। सः न्यवेदयत् यत् उभाभ्यां पक्षाभ्यां परिसीमनं, सीमाप्रबन्धनं, कार्यतन्त्रनिर्माणं तथा सीमासहयोगेन सम्बद्धानां विषयाणां विषये विमर्शः कृतः। सः इदमपि अवदत् यत् भारतेन सीमापारनदीनां विषये आगामिन्याः विशेषज्ञसमित्याः शीघ्रम् उपवेशनम् आह्वातुं बलं दत्तम्।एकस्य प्रश्नस्य उत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयस्वालः अवदत् यत् भारतेन अफ्रीका-सीडीसी-संस्थायै चिकित्सामग्र्याः प्रथमा प्रेषणी (खेप) प्रेषिता। इयं युगाण्डादेशे भारतीय-उच्चायुक्तेन सीडीसीए-कार्यालयस्मै समर्पिता अस्ति। सः अवदत् यत् भारतं अफ्रीकामहाद्वीपे जनस्वास्थ्यस्य आवश्यकताभ्यः सर्वविधां सहायतां कर्तुं तत्परं वर्तते।बाङ्गलादेशस्य अवैधप्रवासिनां विषये श्रीजयस्वालः अवदत् यत् भारते निवसतं सर्वेषाम् अवैधनागरिकाणां विरुद्धं नियमानुसारं विधिकार्यवाही करिष्यते। सः अवदत् यत् भारतेन जनानां राष्ट्रियतां प्रमाणीकर्तुं द्विसहस्राधिकषट्शताशीतिः (२६८०) तः अधिकाः प्रकरणाः बाङ्गलादेशं प्रति प्रेषिताः। सः अवदत् यत् राष्ट्रियतायाः प्रमाणने जाते सति भारतम् एतान् बाङ्गलादेशीयनागरिकान् निर्वासयितुं (देशात् निष्कासयितुं) शक्ष्यति। सः इदमपि ज्ञापितवान् यत् बहुषु प्रकरणेषु इदं प्रमाणनं पञ्चवर्षेभ्यः अधिककालात् प्रलम्बितम् अस्ति।श्रीजयस्वालः सूचितवान् यत् फारस-खातक्षेत्रे (फारस की खाड़ी में) अद्यापि एकादश भारतीयध्वजयुक्तानि पोतानि (जहाज) विद्यन्ते, चतुर्दश पोतानि च होर्मुज-जलडमरूमध्यं तीर्त्वा भारतं प्राप्तुं सफलाः अभवन्।भारत-अमेरिकादेशयोः मध्ये व्यापारिकवार्तायाः विषये प्रवक्ता न्यवेदयत् यत् भारतीयव्यापारिकदलं अप्रैल-मासे अमेरिकादेशस्य प्रस्थानं कृतवत् आसीत्। आगामिनि सप्ताहे अमेरिकादेशस्य व्यापारिकदलस्यापि भारतमागमनं सम्भाव्यते।श्रीजयस्वालः ऊर्जासुरक्षायां बलं दत्त्वा अवदत् यत् भारतं विश्वस्मात् ऊर्जास्रोतःसु विविधतां आनेतुं प्रयासं करोति। सः इदमपि अवदत् यत् अस्मिन् सन्दर्भे भारतं वैश्विकविपणिभ्यः (वैश्विक बाजारों से) मिलितस्य समर्थनस्य स्वागतं करोति। बोलीवियादेशे प्रचलन्त्याः अशान्तेः विषये श्रीजयस्वालः सूचितवान् यत् भारतं स्थितेः उपरि दृष्टिं स्थापयति (निरीक्षणं करोति)

# विश्वस्य सर्वोन्नत-मोटरयान-मार्गे नाहनस्य राघवतोमरेण स्थापितं साफल्यध्वजम्





GUINNESS WORLD RECORDS
CERTIFICATE
The highest altitude road is Umling La Pass at 5,798.251 m (19024 ft 0.73 in) and was achieved by Border Roads Organization / Project / Himank /755 BRTF at Umling La, Ladakh, India on 16 November 2021.
Name RAGHAV TOMAR
Year 2026

**हिमसंस्कृतवार्ताः- नाहनम्।** नाहनस्य सुपुत्रेण राघवतोमरेण हिमं, झञ्झावातं (तूफ़ान) शोणितघनीकारिणीं (खून जमा देने वाली) शीतलतां च विदीर्य विश्वस्य सर्वोन्नत-मोटरयानमार्गे १९,०२४ पादोन्नतशिखरे प्राप्य सिरमौर- जनपदस्य नाम आलोकितं कृतम्। सिरमौरस्य नाहन-निवासिना राघवतोमरेण 'उमलिङ्ग ला' इति पर्वतीयमार्गं (पास) प्राप्य नवीनः इतिहासः रचितः। कठिनासु परिस्थितिषु अपि अस्याः यात्रायाः माध्यमेन युनां कृते शारीरिक-योग्यतायाः (फिटनेस) आत्मविश्वासस्य च प्रेरणादायकः सन्देशः प्रदत्तः। यस्मिन् उन्नतभागे मनुष्यस्य शरीरं शिथिलं भवति तथा च यत्र श्वासग्रहणं किमपि आह्वानसदृशं भवति, यत्र च हिमानीवायवः चरणान् रोद्धु प्रयतन्ते, तस्मिन् स्थाने नाहनस्य यूना राघवतोमरेण स्वस्य त्रिभिः मित्रैः सह प्राप्य सिरमौरस्य नाम नूतनोन्नतशिखरे प्रापितम्।विशेषरूपेण उल्लेखनीयं यत् विश्वस्य सर्वोन्नत- मोटरयान-मार्गः 'उमलिङ्ग ला पास' प्रायः १९,०२४ पादोन्नततायाम् (फीट) अवस्थितः अस्ति। अत्र प्राणवायुः (ऑक्सीजन) सामान्यात् प्रायः अर्धा अवशिष्यते तथा च तापमानं तादृशं भवति यत् कतिपयनिमेषान् यावत् स्थातुमपि कठिनं स्यात्, किन्तु एतासां सर्वासां आह्वानानां मध्ये नाहनस्य राघवतोमरेण स्वमित्रैः श्रीयम केसरवानी, कुशाग्र मिश्रः, कुणालगर्ग इत्यादिभिः सह एषा ऐतिहासिकी यात्रा पूर्णा कृत्वा प्रदर्शिता। अस्यै उपलब्धये तस्मै विशेषप्रमाणपत्रमपि प्रदत्तम् अस्ति।

**कुत्र वर्तते उमलिङ्ग ला?-** उमलिङ्ग ला केवलं कश्चित् मार्गः नास्ति, अपि तु विश्वस्य सर्वतः कठिनेषु साहसिकमार्गेषु (एडवेंचर रूट्स) गण्यते। लद्दाखस्य दुर्गमक्षेत्रे भारत- चीन- सीम्नः समीपे स्थितः एषः मार्गः महताम् साहसिकानां जनान्यपि परीक्षते। अत्र शरीरात् अधिकं मानसिकशक्तेः आवश्यकता भवति। राघवतोमरेण कथितं यत् अस्याः यात्रायाः पृष्ठे निरन्तरं कृता शारीरिकयोग्यता-साधना (फिटनेस ट्रेनिंग) सुदृढा मानसिकसज्जता च महती कारणम् आसीत्। तेन प्रतिपादितं यत् प्रतिकूलासु परिस्थितिषु शरीरं न, अपितु भवतः आत्मविश्वासः एव साहाय्यं करोति। नाहननिवासिनः 'मार्गसुरक्षा- सङ्घस्य' (रोड सेफ़्टी कलब) भूतपूर्वाध्यक्षस्य, नाहन-नगरपरिषदः नवनिर्वाचितायाः पार्षदः पूजातोमर्याः पुत्रस्य राघवतोमरस्य अनेन कार्येण नगरवासिनः भृशम् उत्साहिताः प्रसन्नाश्च सन्ति। राघवतोमरेण साहसस्य शारीरिकयोग्यतायाः च नवीना परिचयं रचयित्वा यूनां सम्मुखं प्रेरणा प्रस्ताविता।

**सङ्कल्पेषु प्राणः भवेत्-** राघवस्य कथनं वर्तते यत् यदि भवतः शरीरं स्वस्थं (फिट) अस्ति सङ्कल्पाश्च दृढाः सन्ति, तर्हि विश्वस्य सर्वोच्चः मार्गोऽपि भवतः गन्तव्यं भवितुं शक्नोति। अद्य नाहनस्य एषः युवा केवलं कश्चित् साहसिकयात्री (एडवेंचर ट्रैवलर) नास्ति, अपितु सहस्रशः यूनां कृते एषः सन्देशः भूत्वा उदितः यत् चलदूरभाषस्य संसारात् बहिः आगत्य स्वं आह्वानानां कृते सज्जकरणमपि आवश्यकं वर्तते।



**लेखिका:-आचार्या रमनदीप कौर**
संस्कृतविदुषी एवं हिन्दुस्तानीशास्त्रीयसंगीतगायिका

# देवी-कवचस्य वैशिष्ट्यम्

कवचस्य अर्थः 'अङ्गावरणम्' इति। यथा योद्धा युद्धकाले शस्त्रप्रहारात् स्वशरीरस्य रक्षणार्थं कवचं धारयति, तथैव साधकः अपि साधनाकाले आध्यात्मिक-शारीरिक-मानसिक-विघ्नानां निवारणार्थं कवचस्य आश्रयं गृह्णाति। अतः कवचधारणं साधनमार्गे अत्यन्तोपयोगि कथितम् अस्ति। यदि कवचेन विना चण्डीपाठादिषु प्रविशेत्, तर्हि सिद्धेः प्राप्तिः दुष्करा भवति। एतदेव कारणं यत् उक्तम्—

**"जपेत्तु चण्डीं कवचं पुरा।**
**निर्विघ्नेन भवेत् सिद्धिः चण्डीजपसमुद्भवा॥"**

अतः सप्तशतीपाठात् पूर्वं देवी-कवचस्य पाठः करणीयः। ये साधकाः श्रद्धया कवचस्य पाठं कुर्वन्ति, ते निर्विघ्नतया चण्डीपाठस्य फलं, सिद्धिं च प्राप्नुवन्ति।

अस्मिन् कवचे शरीरस्य विविधाङ्गानां उल्लेखः अस्ति, तथा तेषां रक्षणार्थं देव्याः विभिन्ननामानि निर्दिष्टानि सन्ति। उदाहरणतया— "प्राच्यां रक्षतु मामैन्द्री", "शिखां मे व्योमचारिणी रक्षेत्" इत्यादयः। अस्य तात्पर्यम् एतत् यत् साधकः मनसा स्वशरीरस्य तेषु तेषु स्थानेषु चित्तं निवेश्य तत्र स्थितां शक्तिं अनुभवेयात्। केवलं कल्पना न, अपितु आन्तरिक-शक्तेः वास्तविकानुभवः अपेक्षितः। यत्र यत्र कवचे देवीनाम्ना शक्तेः आवाहनं कृतम् अस्ति, तत्र तत्र तस्याः शक्तेः अनुभवः साधकेन कर्तव्यः। मन्त्रपाठसमये विशेषमूर्तेः ध्यानस्य आवश्यकता नास्ति; केवलं शक्तेः बोधः पर्याप्तः। यथा "खड्गधारिणी" इत्युक्ते, खड्गधारिण्याः मूर्तेः चिन्तनं न आवश्यकम्, किन्तु तस्याः रक्षाशक्तेः अनुभवः करणीयः। ये साधकाः सत्यप्रतिष्ठिताः सन्ति अथवा गुरुणा प्रदर्शितेन मार्गेण मनः एकाग्रं कर्तुं समर्थाः भवन्ति, ते एतां शक्तिम् अनुभवितुं शक्नुवन्ति। क्रमशः अभ्यासेन कवचस्य प्रभावः साधकस्य अन्तःकरणे जागरूकतां, धैर्यं, मानसिकबलं, आध्यात्मिकप्रकाशं च जनयति। अस्य कवचस्य फलं केवलं स्तुतिमात्रं नास्ति। अस्य प्रत्येकम् अक्षरं सत्यं प्रभावकारी च अस्ति। यदि फलस्य सम्पूर्णप्राप्तिः न भवेत्, तथापि "नश्यन्ति व्याधयः सर्वे" इति वचनानुसारं शारीरिकक्लेशाः अवश्यं निवर्तन्ते। मानसिकबलस्य वृद्धिः, आत्मविश्वासस्य विकासः, आध्यात्मिक-उन्नतिः च अस्य पाठस्य मुख्यफलानि सन्ति। रामकवचम्, सूर्यकवचम्, श्रीकृष्णकवचम्, कालीकवचम् इत्यादीनि यानि कवचानि प्रख्यातानि सन्ति, तेषां नियमितपाठेन अपि सिद्धिः भवति। तथापि देवी-कवचे यथा सर्वाङ्गरक्षणस्य विस्तृतवर्णनं दृश्यते, तथा अन्येषु कवचेषु दुर्लभम्। अतः धर्म-अर्थ-काम-मोक्षेषु अभिलाषिणां साधकानां कृते देवी-कवचस्य पाठः अत्यावश्यकः मन्यते।

देवीसूक्तम्, अर्गला, कीलकम्, देवी-कवचम्— एतानि सर्वाणि चण्डीपाठस्य पूर्वतयारीरूपेण व्यवस्थितानि सन्ति। यथा साधकस्य अभ्यासः, श्रद्धा, एकाग्रता च वर्धते, तथा तस्य सिद्धिः अपि वर्धते।यदि आरम्भे अस्माकं साधना पूर्णतया सफलाभासं न ददाति, तर्हि निराशा न कर्तव्या। पुनः पुनः अभ्यासेन, चण्डीपाठस्य अनुष्ठानेन च, साधकः शनैः शनैः अदृश्यां शक्तिम् अनुभूय अन्ततः चण्डीमहिम्नः गूढरहस्यं ज्ञातुं समर्थः भवति। ततः स मातृकृपया धन्यो भवति।

**"लौकिकन्यायकोशः"**

## "पत्रफलन्यायः"

वृक्षस्य पत्राणि फलानि च भवन्ति। कानिचन पत्राणि जीर्णानि भूत्वा पतन्ति परन्तु तेषां पतनेन फलानां कापि हानिः न भवति एवं कस्मिन्नपि एकस्मिन् मानवे वर्तमानेन एकेन दोषेण मानवः सर्वेऽपि दुष्ट इति नैव मन्तव्यम् इति अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकरः,पुणे/ महाराष्ट्रम्**

# वार्तासंवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। किं त्वया श्रुतम्? अमेरिकायां राष्ट्रपति-ट्रम्प-महोदयस्य मुखेन अङ्कितं नवीनं धनपत्रं निर्मितमस्ति। एतत् द्विशत-पञ्चाशत् मूल्यात्मकं वर्तते।


**नन्दिनी-** आम्, धनविषये तु सर्वदा विवादः जनैः कृतः अस्ति। परं पश्य, चीनदेशे एकेन पूर्वतन- रेलयाल- चालकेन कृत्रिम-बुद्धि-माध्यमेन एकं लघुचित्रं रचितम्। तेन अल्पधनेन उत्तमं कार्यं कृतमस्ति। अतः सः चित्रशालायां कार्यं प्राप्तः।

**काव्या-** सत्यम्, कौशलं सर्वत्र पूजितं भवति। अपरं तु वियतनामदेशस्य विमानस्थानके भारतीययात्रिकैः गरबा-नृत्यं कृतम्। तस्य चलचित्रं जाले बहुभिः दृष्टम्। केचन प्रशंसन्ति केचन च निन्दन्ति।

**नन्दिनी-** विमानस्थानके अनुशासनं पालनीयं भवति। देहली-नगरे अपि एका धनव्यवस्था चर्चायाम् अस्ति। तत्र एकया अधिकारिण्या स्वस्य व्यय-विवरणं दत्तम्। तया उक्तं यत् पञ्चविंशति- सहस्ररुप्यकैः अपि सुखेन जीवनं यापितम्।

# “अङ्गुलीरेखाणां दैवीयरहस्यम्

sudha_sathaye@yahoo.com




१. मानवस्य अङ्गुलीरेखाः गर्भावस्थायाः चतुर्थमासात् निर्मीयन्ते। तस्मिन् काले शिशुः बाह्यजगतः अतीव दूरं भवति, तथापि तस्य परिचयदायिनी भाषा तस्य शरीरे लिख्यमाना भवति।

२. एतासां रेखाणां रचना DNA-सूचनानुसारं भवति; किन्तु आश्चर्यस्य विषयः अयं यत् एताः रेखाः न मातापितृसदृश्याः भवन्ति, न च पूर्वजानां सदृश्याः।

३. यथा कश्चन अदृश्यः तरङ्गप्रभावः त्वचायाम् एताः रेखाः स्वयमेव अङ्कयति। एतत् कस्यचित् अलौकिकव्यवस्थायाः संकेतं ददाति।

४. प्रत्येकस्य मनुष्यस्य अङ्गुलीरेखाः सम्पूर्णे विश्वे सर्वथा भिन्नाः भवन्ति; अद्यावधि तादृशः कश्चन मनुष्यः न जातः यस्य अङ्गुलीरेखाः अन्येन सह पूर्णतया तुल्याः स्युः।

५. अनेन सिद्धं भवति यत् कश्चन अद्वितीयः “शिल्पकारः” अस्ति, यः प्रतिवारं नूतनां कलाकृतिं निर्माति।

६. यदा विश्वस्य महानपि सङ्गणकः एतादृशीं रचनां निर्मातुं न शक्नोति, तदा एषा रचना मानवबुद्धेः परा इति वक्तुं न दोषः।

७. प्रश्नः उदेति- “मम सदृशीं निर्मितिं कः कर्तुं शक्नोति?” एषः प्रश्नः तस्य अदृश्यशिल्पिनः कलां प्रणमति।

८. यदि दुर्घटना भवेत्, त्वचा दग्धा भवेत्, अथवा रेखाः नश्येयुः, तथापि कालान्तरे ताः एव रेखाः यथावत् पुनरागच्छन्ति। न कापि कोशिका अन्यत्र गच्छति, न च रचनायां परिवर्तनं भवति।

९. अनेन ज्ञायते यत् एताः रेखाः केवलं त्वचायाम् एव न सन्ति, अपि तु अस्तित्वस्य गभीरतमे स्तरे उपलिखिताः सन्ति। एषा काचित् आत्मीयप्रतिमा अस्ति।

१०. मानवशरीरस्य अन्यः कश्चन भागः नास्ति यः यथावत् पुनर्निर्मातुं शक्यते; किन्तु अङ्गुलीरेखाः तस्मिन् अपवादरूपाः सन्ति। एतत् दैवीययोजना दर्शयति।

११. अद्यापि विज्ञानम् एतस्य रहस्यस्य सम्पूर्णम् उद्घाटनं कर्तुं न समर्थम्। विज्ञानम् एतत् “Biological Memory” अथवा “Cellular Intelligence” इति वदति; किन्तु आध्यात्मिकदृष्ट्या एषा आत्मनः परिचयः अस्ति।

१२. एतासां रेखाणां वक्राणि, शाखाः, वृत्तानि च सर्वं कस्यचित् विशेषभाषायाः गूढसंकेताः सन्ति, ये केवलं तेषां निर्मात्रा एव ज्ञायन्ते।

१३. अङ्गुलीरेखाः केवलं परिचयस्य साधनं न, किन्तु ब्रह्माण्डस्य नियमाः तथा अस्माकं कर्मकथाः अपि तासु निहिताः सन्ति।

१४. अद्यावधि न किञ्चन तन्त्रज्ञानम्, न कृत्रिमबुद्धिमत्ता, न प्रयोगशाला च एतादृशीः रेखाः निर्मातुं समर्था या वास्तवतः पूर्णतया अद्वितीयाः स्युः।

१५. अनेकाः परम्पराः एताः रेखाः “ईश्वरस्य भाषा” इति मन्यन्ते; अत एव हस्तरेखाविद्या अद्यापि प्रासङ्गिकी च चमत्कारिणी च मन्यते।

१६. यदि अस्माकं परिचयः जन्मपूर्वमेव निश्चितः अस्ति, तर्हि अस्माकं जीवनमपि कदाचित् कस्यचित् “दैवीयलेखस्य” अनुसारं चलति इति सम्भाव्यते।

१७. यदा विज्ञानं क्लान्तं भवति, तदा अध्यात्मं वदति- “कश्चित् अस्ति, यः एतत् सर्वं सञ्चालयति। सः पश्यति, जानाति, निर्माति च।

१८. यदि प्रकृतिः एतावती सूक्ष्मा परिपूर्णा च भवितुं शक्नोति, तर्हि प्रकृतेः पृष्ठे काचित् सर्वोच्चा चेतना अवश्यं अस्ति, यां भारतीयदर्शनं “ब्रह्म” इति वदति।

१९. प्रत्येकम् अङ्गुलीचिह्नम् एकः “ईश्वरीयः गुप्तसङ्केतः” अस्ति, यं केवलं स एव जानाति, येन वयं निर्मिताः।

२०.अतः अन्ते स एव प्रश्नः अवशिष्यते- तस्य शिल्पिनः तुल्यं कार्यं कः कर्तुं शक्नोति उत्तरं स्पष्टम्- “न कोऽपि!” स एव अद्वितीयः, यः प्रतिवारं प्रत्येकस्मिन् देहे नूतनां स्वाक्षरीं रचयति; स एव सृष्टिकर्ता अस्ति!!!

अङ्गुलीरेखाः एतत् सिद्धयन्ति यत् अस्तित्वं प्रत्येकस्मै व्यक्तये अद्वितीयां परिचयमुद्रां ददाति। सा अनन्तस्य ब्रह्माण्डस्य सृष्टेः हस्ताक्षरमिव अस्ति। एतद्वैशिष्ट्यं केवलं शरीरे एव सीमितं नास्ति; अपि तु आत्मपर्यन्तं विस्तृतम् अस्ति। वयम् आस्तिकाः स्याम वा नास्तिकाः, तथापि तस्याः दैव्याः परमचेतनायाः अस्तित्वं सत्ता च स्वीकर्तव्या एव। हिन्दूधर्मानुयायिनः तस्याः अदृश्यायाः सर्वोच्चशक्तेः एव उपासकाः भवन्ति- कदाचित् मूर्तिपूजकरूपेण, कदाचित् नास्तिकरूपेणापि

**....सुधा साठ्ये, मुंबई।**

# ईश्वरः अस्मिन् कृष्णरूपेण पृथिवीं प्रेषयति किन्तु वयं कर्मणा कंसाः भवामः




कस्मिंश्चित् ग्रामे कश्चन बालकः प्रतिदिनं मन्दिरं गच्छति स्म। सः बालकः मन्दिरं गत्वा चित्रं निर्माति स्म। एकदा तस्य बालकस्य चित्राङ्कनं दृष्ट्वा मन्दिरस्य अर्चकः तं बालकं बहुधा प्रशंसां कृत्वा अवदत् हे वत्स! त्वं तु अतीव सुन्दरं चित्रं निर्मासि। मन्दिरस्य कृते त्वं किञ्चन चित्रं निर्माहि येन श्रद्धालवः उपकृताः भवन्तु। सः बालकः अस्तु इत्युक्त्वा अवदत् पण्डितमहाशय! अहं कंसवधस्य चित्रं निर्मास्यामि। तदर्थं कस्यचित् बालकस्य आवश्यकता अस्ति यं दृष्ट्वा अहं कृष्णस्य चित्रं निर्मातुं शक्नुयाम्। ततः मन्दिरस्य अर्चकः ग्रामस्य सर्वान् बालकान् आहूय आनयत्। ततः तान् सर्वान् दृष्ट्वा सः बालचित्रकारः तेषु एकं बालकं दर्शयित्वा अवदत् हे पण्डितमहाशय! अहम् एतस्मिन् बालके कृष्णं पश्यामि। तं पुरतः उपाविश्य कृष्णस्य चित्रं निर्मास्यामि। ततः सः बालचित्रकारः तं बालकं दृष्ट्वा हि श्रीकृष्णस्य चित्रं निरमात्। तस्य तत् कार्यं दृष्ट्वा सर्वे हर्षिताः अभवन्, तदानीं हि तस्य कार्यस्य कीर्तिः सर्वत्र प्रसृता अभवत्। ततः सः बालचित्रकारः प्रसिद्धः भूत्वा नगराणि गत्वा यत्र तत्र चित्राणि निर्माय महत् यशः धनं च अलभत। एवमेव सः बहूनि वर्षाणि यावत् नगरेषु उषित्वा पुनः स्वीयं ग्रामं प्रत्यागच्छत्। ततः सः तत् मन्दिरं गत्वा तम् अर्चकं प्रणम्य अब्रवीत् हे पण्डितमहाशय! भवान् माम् अभिज्ञातवान् किम्? अहं सः अस्मि यः बाल्ये अत्र अस्मिन् मन्दिरप्राङ्गणे श्रीकृष्णस्य चित्रं निरमाम्। पण्डितमहाशयः तस्य तद् वचनं श्रुत्वा अत्यन्तं सन्तुष्टः भूत्वा अवदत् हे वत्स! त्वं तु चित्रम् अपूर्णं निरमाः। इदानीं तत् चित्रं पूर्णं कुरु। सः चित्रकारः तदा सन्तुष्टः भूत्वा अवदत् हे पण्डितमहाशय! इदानीं तु कंसवत् कस्यचित् पुरुषस्य आवश्यकता अस्ति। तद्वत् कमपि आनयतु। चित्रकारस्य तद् वचनं श्रुत्वा मन्दिरस्य अर्चकः ग्रामस्य सर्वान् आहूय अदर्शयत् किन्तु सः चित्रकारः तेषु कमपि कंसवद् न अपश्यत्। ततः अर्चकः अब्रवीत् - तर्हि वयं कारागारं गच्छामः, तत्रत्यः बन्दीपालः मम परिचितः। एवमुक्त्वा पण्डितः चित्रकारेण सह तत्र उपस्थितान् अन्यान् सर्वान् नीत्वा कारागारम् अगच्छत्। तत्र गत्वा पण्डितमहाशयः तं चित्रकारं कारागारे बद्धान् सर्वान् अदर्शयत्। तेषु कञ्चन दृष्ट्वा चित्रकारः अङ्गुल्या दर्शयित्वा अब्रवीत् हे पण्डितमहाशय! एषः एव कंसवद् दृश्यते। अहं तस्यैव चित्रं कंसस्य कृते निर्मास्यामि। ततः तं पुरुषं पुरतः उपाविश्य सः चित्रकारः कंसस्य चित्रं निरमात्। एवं तत् चित्रं पूर्णम् अभवत्। एवं चित्रनिर्माणं दृष्ट्वा तत्रत्याः सर्वे अत्यन्तं सन्तुष्टाः अभवन् किन्तु कारागारे यः बद्धः आसीत्, कंसरूपेण यस्य चित्रम् अभवत् सः रोदिति स्म। एवं दृष्ट्वा सर्वे अपृच्छन् - किम् अभूत्? भवतः तु सौभाग्यं यद् भवतः चित्रम् अस्मिन् मन्दिरे अभूत्! तेषां तद् वचनं श्रुत्वा सः बन्दी अब्रवीत् - अहम् एतदर्थं न रोदिमि, अपितु तदर्थं रोदिमि यद् अस्मिन् चित्रे कृष्णरूपेण यः अस्ति सः बाल्ये अहमेव आसम्।